# brahmadevakRitaM rAmastutiH

# શ્રીરામસ્તુતી બ્રહ્મદેવકૃતમ્

## Document Information

Text title : brahmadevakRitaM rAmastutiH

File name : brahmaraamastuti.itx

Category : raama, stotra, vyAsa

Location : doc_raama

Author : Brahmadeva

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : adhyAtmarAmAyaNa

Latest update : January 03, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 1, 2024

*sanskritdocuments.org*

# શ્રીરામસ્તુતી બ્રહ્મદેવકૃતમ્

શ્રી ગણેશાય નમઃ ।
બ્રહ્મોવાચઃ ।
વન્દે દેવં વિષ્ણુમશેષસ્થિતિહેતું ત્વામધ્યાત્મજ્ઞાનિભિરન્તર્હૃદિ ભાવ્યમ્ ।
હેયાહેયદ્વન્દ્વવિહીનં પરમેકં સત્તામાત્રં સર્વહૃદિસ્થં દૃશિરૂપમ્ ॥ ૧॥

પ્રાણાપાનૌ નિશ્ચયબુદ્ધ્યા હૃદિ રુદ્ધ્વા છિત્વા સર્વં સંશયબન્ધં વિષયૌઘાન્ ।
પશ્યન્તીશં યં ગતમોહા યતયસ્તં વન્દે રામં રત્નકિરીટં રવિભાસમ્ ॥ ૨॥

માયાતીતં માધવમાદ્યં જગદાદિં માનાતીતં મોહવિનાશં મુનિવન્દ્યમ્ ।
યોગિધ્યેયં યોગવિધાનં પરિપૂર્ણં વન્દે રામં રઞ્જિતલોકં રમણીયમ્ ॥ ૩॥

ભાવાભાવપ્રત્યયહીનં ભવમુખ્યૈર્ભોગાસક્તૈરર્ચિતપાદામ્બુજયુગ્મમ્ ।
નિત્યં શુદ્ધં બુદ્ધમનન્તં પ્રણવાખ્યં વન્દે રામં વીરમશેષાસુરદાવમ્ ॥ ૪॥

ત્વં મે નાથો નાથિતકાર્યાખિલકારી માનાતીતો માધવરૂપોઽખિલધારી ।
ભક્ત્યા ગમ્યો ભાવિતરૂપો ભવહારી યોગાભ્યાસૈર્ભાવિતચેતઃસહચારી ॥ ૫॥

ત્વામાદ્યન્તં લોકતતીનાં પરમીશં લોકાનાં નો લૌકિકમાનૈરધિગમ્યમ્ ।
ભક્તિશ્રદ્ધાભાવસમેતૈર્ભજનીયં વન્દે રામં સુન્દરમિન્દીવરનીલમ્ ॥ ૬॥

કો વા જ્ઞાતું ત્વામતિમાનં ગતમાનં માનાસક્તો માધવશક્તો મુનિમાન્યમ્ ।
વૃન્દારણ્યે વન્દિતવૃન્દારકવૃન્દં વન્દે રામં ભવમુખવન્દ્યં સુખકન્દમ્ ॥ ૭॥

નાનાશાસ્ત્રૈર્વેદકદમ્બૈઃ પ્રતિપાદ્યં નિત્યાનન્દં નિર્વિષયજ્ઞાનમનાદિમ્ ।
મત્સેવાર્થં માનુષભાવં પ્રતિપન્નં વન્દે રામં મરકતવર્ણં મથુરેશમ્ ॥ ૮॥

શ્રદ્ધાયુક્તો યઃ પઠતીમં સ્તવમાદ્યં બ્રાહ્મં બ્રહ્મજ્ઞાનવિધાનં ભુવિ મર્ત્યઃ ।
રામં શ્યામં કામિતકામપ્રદમીશં ધ્યાત્વા ધ્યાતા પાતકજાલૈર્વિગતઃ સ્યાત્ ॥ ૯॥

॥ ઇતિ શ્રીમદ્ધ્યાત્મરામાયણે યુદ્ધકાણ્ડે બ્રહ્મદેવકૃતં રામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*brahmadevakRitaM rAmastutiH*

pdf was typeset on September 1, 2024

Please send corrections to *sanskrit@cheerful.com*